"सर्व्वदोषानभिष्वङ्गादाम्नायसमतां गताः ।
युष्माकमभ्युपगमाः प्रमाणं पुण्यपापयोः" ।
इति महावीरचरिते ।)

अभ्युपपत्तिः, स्त्री, (अभि + उप + पद + क्तिन् ।) अनुग्रहः । इत्यमरः ॥ (अनिष्टनिवारणपूर्व्वकाभीष्टसम्पादनरूपोऽनुग्रहः । प्रसादः । "तदर्हस्याभ्युपपत्त्या जीवितमस्या अवलम्बितुम्" । इति शाकुन्तले । रक्षा । परित्राणं ।
"कामिनीषु विवाहेषु गवाम्भक्ष्ये तथेन्धने ।
ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्" ।
इति मनुः ।)

अभ्युपायः, पुं, (अभि + उप + इण + भावे अच् ।) अङ्गीकारः । स्वीकारः । इति हेमचन्द्रः ॥ उपायः । यथा । "तत्स्वीकृतिव्यतिकरे क इहाभ्युपायः" । इति काव्यप्रकाशः ॥ (कौशलं ।
"अनेकैरभ्युपायैस्ते जिघांसन्ति स्म पाण्डवान्" ।
"निपुणेनाभ्युपायेन नगरं वारणावतं" ।
"निपुणेनाभ्युपायेन यदहं ब्रवीमि तथा कुरु" ॥
इति महाभारते ।)

अभ्युपायनं, क्ली, (अभि + उप + इण् + ल्युट् ।) उपायनं । उपढौकनद्रव्यं । यथा,—
"तावानय समं गोपैर्नन्दाद्यैः साभ्युपायनैः" ।
इति श्रीभागवतं ॥

अभ्युपेतं, त्रि, (अभि + उप + इण् + कर्म्मणि क्तः ।) स्वीकृतं । उपगतं । यथा,—
"अहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः" ।
इति रघुः ॥ (अङ्गीकृतः ।
"मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः" ।
इति मेघदूते ।)

अभ्युषः, पुं, (अभ्युष्यते अग्निना दह्यतेऽसौ अभि + उष् + बाहुल्यात् कर्म्मणि कः ।) अभ्यूषः । पौलिः । इत्यमरटीकायां भरतः ॥

अभ्यूषः, पुं, (अभि + ऊष + बाहुल्यात् कर्म्मणि कः ।) पाकावस्थागतकलायादिः । अारब्धपाकयवसर्षपादिः । वह्निना ईषद्दग्धः चुट चुट शब्दवान् इति केचित् ॥ दरदग्ध इति श्रीधरः ॥ तत्पर्य्यायः । अापक्वं २ पौलिः ३ । इत्यमरः ॥ अभ्युषः ४ अभ्योषः ५ । इति भरतः ॥ * ॥ पोलिका । रोटी इति प्रसिद्धा । अस्या गुणाः । मधुरत्वं । गुरुत्वं । रोचकत्वं । बलकारित्वं । श्लेष्मवृद्धिजनकत्वं । पित्तरक्तप्रदायित्वञ्च ॥ * ॥ अङ्गारकृतायास्तस्या गुणाः । अग्निदीपनत्वं । वायुवृद्धिकारित्वं । लघुत्वं । बलकारित्वञ्च ।
"सा स्वहयुक्ता चेत् घनाघनगुणान्विता" ।
इति राजनिर्घण्टः ॥ ईषत्पक्वं । यथा,—
"अापक्वमवपक्वं स्यादाभ्युषः पौलिपौलिके ।
अभ्यूषोऽभ्योष इत्येते ईषत्पक्वयवादिषु" ॥
इति शब्दरत्नावली ॥

अभ्योषः, पुं, (अभ्युष्यते अग्निना दह्यतेऽसौ, अभि + ऊष + कर्म्मणि घञ् ।) अभ्यूषः । इत्यमरटीकायां भरतः ॥

अभ्र गत्यां । इति कविकल्पद्रुमः ॥ अोष्ठवर्गचतुर्थोपधः । अभ्रति । इति दुर्गादासः ।

अभ्रं, क्ली, (अपोबिभर्त्ति इति अप + भृ + क ।) मेघः । आकाशं । स्वर्णं । अभ्रकधातुः । इति मेदिनी ॥ उपधातुविशेषः । तस्योत्पत्तिनामलक्षणगुणाः ।
"पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतं ।
विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः ॥
ते निपेतुर्घनध्वानाच्छिखरेषु महीभृतां ।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकं ॥
तद्वज्रं वज्रजातत्वादभ्रमभ्ररवोद्भवात् ।
गगनाद्दलितं यस्माद्गगनञ्च ततो मतं ॥
विप्रक्षत्त्रियविट्शूद्रभेदात्तत् स्याच्चतुर्व्विधं ।
क्रमेणैव सितं रक्तं पीतं कृष्णञ्च वर्णतः ॥
प्रशस्यते सितं तारे रक्तं तन्तु रसायने ।
पीतं हेमनि कृष्णन्तु गदेषु भूतयेऽपि च ॥
पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधं ।
मुञ्चत्यग्नौ विनिःक्षिप्तं पिनाकं दलसञ्चयं ॥
अज्ञानाद्भक्षणात्तस्य महाकुष्ठप्रदायकं ।
दर्दुरं त्वग्निनिःक्षिप्तं कुरुते दर्दुरध्वनिं ॥
गोलकान् बहुशः कृत्वा स स्यान्मृत्युप्रदायकः ।
नागन्तु नागवद्वह्नौ फुत्कारं परिमुञ्चति ॥
तद्भक्षितमवश्यन्तु विदधाति भगन्दरं ।
वज्रन्तु वज्रवत्तिष्ठेत्तन्नाग्नौ विकृतिं व्रजेत् ॥
सर्व्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ।
अभ्रमुत्तरशैलोत्थं बहुसत्वं गुणाधिकं ॥
दक्षिणाद्रिभवं स्वल्पसत्वमल्पगुणप्रदं" ॥ * ॥
मारिताभ्रगुणाः ।
"अभ्रं कषायं मधुरं सुशीत-
मायुष्करं धातुविवर्द्धनञ्च ।
हन्यात्त्रिदोषं व्रणमेहकुष्ठं
प्लीहोदरग्रन्थिविषकृमींश्च ॥
"रोगान् हन्ति द्रढयति वपुर्वीर्य्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव ।
दीर्घायुष्कान् जनयति सुतान् विक्रमैः सिंहतुल्यान्
मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रं" ॥ * ॥
अशोधिताभ्रदोषाः ।
"पीड़ां विधत्ते विविधां नराणां
कुष्ठं क्षयं पाण्डुगदञ्च शोथं ।
हृत्पार्श्वपीड़াञ्च करोत्यशुद्ध-
मभ्रं ह्यसिद्धं गुरुतापदं स्यात्" ॥ * ॥
अस्य शोधनविधिर्यथा ।
"कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिःक्षिपेत् ।
भिन्नपत्रन्तु तत् कृत्वा तण्डुलीयाम्लजैर्द्रवैः ॥
भावयेदष्टयामं तदेवमभ्रं विशुध्यति" ॥ * ॥
तस्य मारणं यथा ॥
"कृत्वा धान्याभ्रकं तच्च शोधयित्वाथ मर्दयेत् ।
अर्कक्षीरैर्दिनं खल्ले चक्राकारञ्च कारयेत् ॥
वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत् ।
पुनर्म्मर्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः ॥
ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयं ।
म्रियते नात्र सन्देहः प्रयोज्यं सर्व्वकर्म्मसु ॥
तुल्यं घृतं मृताभ्रेण लौहपात्रे विपाचयेत् ।
घृते जीर्णे तदभ्रन्तु सर्व्वयोगेषु योजयेत्" ॥ * ॥
तत्र धान्याभ्रस्य विधिः ।
"पादांशसलिलं युक्तमभ्रं बद्ध्वाथ कम्बले ।
त्रिरात्रं स्थापयेन्नीरे तत् क्लिन्नं मर्दयेत् करैः ॥
कम्बलाद्गलितं सूक्ष्मं बालुकारहितञ्च यत् ।
तद्धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये" ॥
इति भावप्रकाशः ॥

अभ्रंलिहः, पुं, (अभ्रं लेढि स्पृशति, अभ्र + लिह कर्त्तरि खश्, मुमागमः ।) वायुः । इति पाणिनिः ॥ (मेघस्पर्शी । अत्युच्चः ।
"अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः" ॥
इति मेघदूते ।)

अभ्रकं, क्ली, (अभ्र गतौ + ण्वुल्, तस्य अक ।) स्वनामख्यातधातुः । अाभ इति भाषा । तत्पर्य्यायः । गिरिजं २ अमलं ३ । इत्यमरः ॥ गिरिजामलं ४ गौर्य्यामलं ५ । इति स्वामी ॥ गिरिजावीजं ६ गरजध्वजं ७ । इति वाचस्पतिः ॥ शुभ्रं ८ । इति जटाधरः ॥ घनं ९ व्योम १० अब्दं ११ । इति रत्नमाला ॥ अभ्रं १२ भृङ्गं १३ अम्बरं १४ अन्तरीक्षं १५ आकाशं १६ बहुपत्रं १७ खं १८ अनन्तं १९ गौरीजं २० गौरीजेयं २१ । इति राजनिर्घण्टः ॥ अस्य गुणाः । रसायनत्वं । स्निग्धत्वं बलवर्णाग्निवर्द्धकत्वञ्च । इति राजवल्लभः ॥ अपि च । गुरुत्वं । हिमत्वं । बल्यत्वं । कुष्ठमेहत्रिदोषनाशित्वञ्च ॥ * ॥ तच्चतुर्व्विधं यथा,—
"श्वेतं पीतं लोहितं नीलमभ्रं
चातुर्व्विध्यं चातिभिन्नक्रियार्हं ।
श्वेतं तारे काञ्चने पीतरक्ते
नीलं व्याधिव्यग्रमग्र्यं गुणाढ्यं" ॥
इति मदनविनोदः ॥
("अभ्रकस्तव वीजन्तु मम वीजन्तु पारदः ।
अनयोर्मेलनं देवि मृत्युदारिद्र्यनाशनं" ॥
इति चक्रदत्तः ।)

अभ्रङ्कषः, पुं, (अभ्रमाकाशं कषति गच्छति धातूनामनेकार्थत्वात् अभ्र + कष् + खच् + मुम् ।) वायुः । इति पाणिनिः ॥ (मेघस्पर्शी । अत्युन्नतः । अभ्रंलिहः ।
"सर्व्वङ्कषयशःशाखं रामकल्पतरुं कपिः ।
आदायाभ्रङ्कषं प्रायान्मङ्गलं फलशालिनं" ॥
इति भट्टिकाव्ये ।)

अभ्रपिशाचः, पुं, (अभ्रे आकाशे पिशाच इव । तस्य छायात्मकत्वेन नीलवर्णतया पिशाचतुल्यत्वं ।) राहुग्रहः । इति त्रिकाण्डशेषः ॥

अभ्रपिशाचकः, पुं, (अभ्रे पिशाच इव इवार्थे कन् ।) राहुग्रहः । इति हारावली ॥

अभ्रपुष्पं, क्ली, (अभ्रं मेघ एव पुष्पं जलरूपफलस्य निदानं यस्य तत्, तस्य मेघप्रभवत्वात् तथात्वं ।) जलं । यथा,—
"अभ्रपुष्पमपि दित्सति शीतं
सार्थिना विमुखता यदभाजि" । इति नैषधं ॥